परमेश्वर स्तुति स्तोत्रम् in Hindi

त्वमेकः शुद्धोऽसि त्वयि निगमबाह्या मलमयं
प्रपञ्चं पश्यन्ति भ्रमपरवशाः पापनिरताः।
बहिस्तेभ्यः कृत्वा स्वपदशरणं मानय विभो
गजेन्द्रे दृष्टं ते शरणद वदान्यं स्वपददम्॥**1**॥

न सृष्टेस्ते हानिर्यदि हि कृपयातोऽवसि च मां
त्वयानेके गुप्ता व्यसनमिति तेऽस्ति श्रुतिपथे।
अतो मामुद्धर्तुं घटय मयि दृष्टिं सुविमलां
न रिक्तां मे याच्ञां स्वजनरत कर्तुं भव हरे॥**2**॥

कदाहं भो स्वामिन्नियतमनसा त्वां हृदि
भजन्नभद्रे संसारे ह्यनवरतदुःखेऽतिविरसः।
लभेयं तां शान्तिं परममुनिभिर्या ह्यधिगता
दयां कृत्वा मे त्वं वितर परशान्तिं भवहर॥**3**॥

विधाता चेद्विश्वं सृजति सृजतां मे शुभकृतिं
विधुश्चेत्पाता मावतु जनिमृतेर्दुःखजलधेः।
हरः संहर्ता संहरतु मम शोकं सजनकं
यथाहं मुक्तः स्यां किमपि तु तथा ते विदधताम्॥**4**॥

अहं ब्रह्मानन्दस्त्वमपि च तदाख्यः सुविदित
स्ततोऽहं भिन्नो नो कथमपि भवत्तः श्रुतिदृशा।
तथा चेदानीं त्वं त्वयि मम विभेदस्य जननीं
स्वमायां संवार्य प्रभव मम भेदं निरसितुम्॥**5**॥

कदाहं हे स्वामिञ्जनिमृतिमयं दुःखनिबिडं
भवं हित्वा सत्येऽनवरतसुखे स्वात्मवपुषि।
रमे तस्मिन्नित्यं निखिलमुनयो ब्रह्मरसिका
रमन्ते यस्मिंस्ते कृतसकलकृत्या यतिवरा॥**6**॥

पठन्त्येके शास्त्रं निगममपरे तत्परतया
यजन्त्यन्ये त्वां वै ददति च पदार्थांस्तव हितान्।

अहं तु स्वामिंस्ते शरणमगमं संसृतिभयाद्यथा
ते प्रीतिः स्याद्धितकर तथा त्वं कुरु विभो॥7॥

अहं ज्योतिर्नित्यो गगनमिव तृप्तः सुखमयः
श्रुतौ सिद्धोऽद्वैतः कथमपि न भिन्नोऽस्मि विधुतः।
इति ज्ञाते तत्त्वे भवति च परः संसृतिलया
दतस्तत्त्वज्ञानं मयि सुघटयेस्त्वं हि कृपया॥8॥

अनादौ संसारे जनिमृतिमये दुःखितमना
मुमुक्षुः सन्कश्चिद्भजति हि गुरुं ज्ञानपरमम्।
ततो ज्ञात्वा यं वै तुदति न पुनः क्लेशनिवहै
भजेऽहं तं देवं भवति च परो यस्य भजनात्॥9॥

विवेको वैराग्यो न च शमदमाद्याः षडपरे
मुमुक्षा मे नास्ति प्रभवति कथं ज्ञानममलम्।
अतः संसाराब्धेस्तरणसरणिं मामुपदिशन्
स्वबुद्धिं श्रौतीं मे वितर भगवंस्त्वं हि कृपया॥10॥

कदाहं भो स्वामिन्निगममतिवेद्यं शिवमयं
चिदानन्दं नित्यं श्रुतिहृतपरिच्छेदनिवहम्।
त्वमर्थाभिन्नं त्वामभिरम इहात्मन्यविरतं
मनीषामेवं मे सफलय वदान्य स्वकृपया॥11॥

यदर्थं सर्वं वै प्रियमसुधनादि प्रभवति
स्वयं नान्यार्थो हि प्रिय इति च वेदे प्रविदितम्।
स आत्मा सर्वेषां जनिमृतिमतां वेदगदित
स्ततोऽहं तं वेद्यं सततममलं यामि शरणम्॥12॥

मया त्यक्तं सर्वं कथमपि भवेत्स्वात्मनि मतिस्त्वदीया
माया मां प्रति तु विपरीतं कृतवती।
ततोऽहं किं कुर्यां न हि मम मतिः क्वापि चरति
दयां कृत्वा नाथ स्वपदशरणं देहि शिवदम्॥13॥

नगा दैत्या: कीशा भवजलधिपारं हि गमितास्त्वया

चान्ये स्वामिन्किमिति समयेऽस्मिञ्छयितवान्।
न हेलां त्वं कुर्यास्त्वयि निहितसर्वे मयि विभो
न हि त्वाहं हित्वा कमपि शरणं चान्यमगमम्॥**14**॥

अनन्ताद्या विज्ञा न गुणजलधेस्तेऽन्तमगमन्नतः
न पारं यायात्तव गुणगणानां कथमयम्।
गुणवद्धि त्वां जनिमृतिहरं याति परमां
गतिं योगिप्राप्यामिति मनसि बुद्ध्वाहमनवम्॥**15**॥

Parameshwara Stuti Stotram in English

**Tvamekaḥ śuddho'si tvayi nigamabāhyā malamayaṁ
prapañcaṁ paśyanti bhramaparavaśāḥ pāpaniratāḥ |
Bahistebhyaḥ kṛtvā svapadaśaraṇaṁ mānaya vibho
gajendre dṛṣṭaṁ te śaraṇada vadānyaṁ svapadadam || 1 ||**

**Na sṛṣṭeste hānir yadi hi kṛpayāto'vasi ca māṁ
tvayāneke guptā vyasanamiti te'sti śrutipathe |
Ato māmuddhartuṁ ghaṭaya mayi dṛṣṭi suvimalāṁ
na riktāṁ me yācñāṁ svajanarata kartuṁ bhava hare || 2 ||**

**Kadāhaṁ bho svāmin niyatamanasā tvāṁ hṛdi
bhajannabhadre saṁsāre hyanavaratāduḥkhe'tivirasaḥ |
Labheyaṁ tāṁ śāntiṁ paramamunibhir yā hyadhigatā
dayāṁ kṛtvā me tvaṁ vitara paraśāntiṁ bhava hara || 3 ||**

**Vidhātā ced viśvaṁ sṛjati sṛjatāṁ me śubhakṛtiṁ
vidhuś cet pāta māvatu janimṛter duḥkhajaladheḥ |
Haraḥ saṁhartā saṁharatu mama śokaṁ sajanakaṁ
yathāhaṁ muktaḥ syāṁ kimapi tu tathā te vidadhatām || 4 ||**

**Ahaṁ brahmānandas tvamapi ca tadākhyaḥ suviditaḥ
tato'haṁ bhinno no kathamapi bhavattaḥ śrutidṛśā |
Tathā cedānīṁ tvaṁ tvayi mama vibhedasya jananīṁ
svamāyāṁ saṁvārya prabhava mama bhedaṁ nirasitum || 5 ||**

**Kadāhaṁ he svāmiñ janimṛtimayaṁ duḥkhanibiḍaṁ
bhavaṁ hitvā satye'navaratasukhe svātmavapuṣi |
Rame tasminnityaṁ nikhilamunayo brahmarasikā
ramante yasmīṁste kṛtasakalakṛtyā yativarāḥ || 6 ||**

**Paṭhantyeke śāstraṁ nigamamapare tatparatayā
yajantyanye tvāṁ vai dadati ca padārthāṁstava hitān |
Ahaṁ tu svāminste śaraṇamagamaṁ saṁsṛtibhayād yathā
te prītiḥ syāddhitakara tathā tvaṁ kuru vibho || 7 ||**

Ahaṁ jyotirnityo gaganamiva tṛptaḥ sukhamayaḥ
śrutau siddho'dvaitaḥ kathamapi na bhinno'smi vidhutaḥ|
Iti jñāte tattve bhavati ca paraḥ saṁsṛtilayā
dataḥ tattvajñānaṁ mayi sughaṭayestvaṁ hi kṛpayā||8||

Anādau saṁsāre janimṛtimaye duḥkhitamanā
mumukṣuḥ san kaścid bhajati hi guruṁ jñānaparamam|
Tato jñātvā yaṁ vai tudati na punaḥ kleśanivahai
bhaje'haṁ taṁ devaṁ bhavati ca paro yasya bhajanāt||9||

Viveko vairāgyo na ca śamadamādyāḥ ṣaḍapare
mumukṣā me nāsti prabhavati kathaṁ jñānamamalam|
Ataḥ saṁsārābdhes taraṇasaraṇiṁ māmupadiśan
svabuddhiṁ śrautīṁ me vitara bhagavaṁstvaṁ hi kṛpayā||10||

Kadāhaṁ bho svāmin nigamativedyaṁ śivamayaṁ
cidānandaṁ nityaṁ śrutihṛtaparicchedanivaham|
Tvamarthābhinnaṁ tvāmabhirama ihātmanyaviratam
manīṣāmevaṁ me saphalaya vadānya svakṛpayā||11||

Yadarthaṁ sarvaṁ vai priyamasudhanādi prabhavati
svayaṁ nānyārtho hi priya iti ca vede praviditam|
Sa ātmā sarveṣāṁ janimṛtimatāṁ vedagaditaḥ
tato'haṁ taṁ vedyaṁ satatamamalaṁ yāmi śaraṇam||12||

Mayā tyaktaṁ sarvaṁ kathamapi bhavetsvātmani matis tvadīyā
māyā māṁ prati tu viparītaṁ kṛtavatī|
Tato'haṁ kiṁ kuryāṁ na hi mama matiḥ kvāpi carati
dayāṁ kṛtvā nātha svapadaśaraṇaṁ dehi śivadam||13||

Nagā daityāḥ kīśā bhavajaladhipāraṁ hi gamitās tvayā
cānye svāmin kimiti samaye'smiñ chayitavān|
Na helāṁ tvaṁ kuryās tvayi nihitasarve mayi vibho
na hi tvāhaṁ hitvā kamapi śaraṇaṁ cānyamagamam||14||

Anantādyā vijñā na guṇajaladhe ste'ntam agaman nataḥ
na pāraṁ yāyāt tava guṇagaṇānāṁ kathamayam|

Guṇavaddhi tvāṁ janimṛtiharaṁ yāti paramāṁ
gatiṁ yogiprāpyām iti manasi buddhvāham anavam॥15॥